श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीकृष्णब्रह्मतन्त्रपरकालयतीन्द्र कृतिषु

# ॥ प्रपन्नामृतस्तोत्रम् ॥

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ प्रपन्नामृतस्तोत्रम् ॥

कलयतु कल्याणगुणं कमलाकुचकुङ्कुमाङ्कितोरस्कम्।
यदुवंशमौक्तिकं तत्किमपि महस्सर्वदाऽपि मम हृदयम्॥ १॥

वन्दे तं देवसुतं वसुदेववधूस्तनन्धयं कमपि।
वरदं वरेण्यशीलं वल्लवभवनात्तलीलमिह बालम्॥ २॥

व्रजरचितकेळिसुदतीव्रजहृदयानन्दकन्दळं किमपि।
व्रज हृदय दिव्यतेजो वृजिनतमोमूलभेदनपटिष्ठम्॥ ३॥

लीलामुदितयशोदं ललितप्रस्निग्धमुग्धतरवादम्।
आकुञ्चितैकपादं भज तेजः किमपि विरचिताह्लादम्॥ ४॥

हृदयनवनीतचोरं पारदतरळाङ्घ्रिकमलसञ्चारम्।
परिलुलितगोपदारं गृहाण यत्नेन कमपि सुकुमारम्॥ ५॥

गोपवधूभोगार्हं शेखरितानर्घबर्हिवरबर्हम्।
घनविभवपारिबर्हं कलये हृदये चिराय दाशार्हम्॥ ६॥

गोखुरविदारितावनिधूळिधूसरितकुन्तलमुदारम्।
सञ्चिन्तयेऽन्तरङ्गे सकुमारं कमपि वल्लवकुमारम्॥ ७॥

कमपि घनाघननीलं गोपवधूटीकुचग्रहविलोलम्।
कलयामि गोपबालं लोलालकजालमधुकरितफालम्॥ ८॥

कुन्दविनिन्दनरदनान्मन्दितपूर्णेन्दुबिम्बरुचिवदनान्।
मुनिहृदयकेळिसदनान्व्रजविभवांस्तान्भजे विधुतमदनान्॥ ९॥

नन्दानन्दनचन्दन मुचुकुन्दानन्दकन्द गोविन्द।
मम विन्द हृदरविन्दं मिळिन्दसुन्दर मुकुन्द ननु मन्दम्॥ १०॥

www.prapatti.com

किमपि यशोदाभाग्यं व्रजललनापृथुलकुचयुगीभोग्यम्।
रक्षामि नीलरत्नं रमणीयं हृदयसंपुटे नूत्नम्॥ ११ ॥

मुरळीनिनादरसभरतरळीकृततर्णकव्रजो भजताम्।
कोऽपि घनाघनशाबः कोमळरूपोऽद्य दहरगहनं मे॥ १२ ॥

काळिन्दीपुळिनान्तरकलितविहारं मनोज्ञमणिहारम्।
तेजः किमपि विलीनं जागर्तु मदीयहृदि रुचिरलीलम्॥ १३ ॥

कानपि भजे विलासान्कलितव्रजसुन्दरीरुचिररासान्।
राधाकटाक्षदासान् राकासितकिरणसखहासान्॥ १४ ॥

अतिमुग्धं दधि लब्धुं सुस्निग्धं वस्तु किमपि मम सिद्धम्।
चारुमुखं तारसखस्मेरनखं तच्चिरादपारसुखम्॥ १५ ॥

विकटातिदर्पदुर्मदशकटासुरधूतिधुर्यचरणतलम्।
प्रकटानुरागरुचिरं सुकटाक्षान्मयि तनोतु तत्तेजः॥ १६ ॥

यमुनाकूलविहारं यमिनामधुनाऽपि हन्त बहुदूरम्।
महदच्युतकैशोरं मम हृदि वितनोतु नित्यसञ्चारम्॥ १७ ॥

बहुतरतरङ्गघट्टितयमुनाशुक्तयुदरगळितमिव नीलम्।
मुक्ताफलं प्रविचलत्तत्र विचित्रं विभावये हृदये॥ १८ ॥

सोमाननगोपीजनकौमारहरं प्रवाळलसदधरम्।
तरुणं कमपि मनोहरचरणं शरणं भजे धृताभरणम्॥ १९ ॥

खञ्जितगोपीहृदयं रञ्जितभुवनं श्रयामि गोपशिशोः।
सञ्जीवितगोसन्तति मञ्जुळमञ्जीरशिञ्जितं नृत्तम्॥ २० ॥

काळीयफणमणिमध्ये नीलतरं नूत्नजातमिवरत्नम्।
तन्मूर्धन्यस्तपदं चूडालङ्करणमस्तु धाम मम॥ २१ ॥

सितकरकिरणत्रस्यद्गोपीरतिकेळिरचिततिमिरभरम्।
तत्किमपि धाम हृदये नीलतरं नस्तमो निराकुरुताम्॥ २२ ॥

www.prapatti.com

निर्मलतरमतिशिशिरं निरुपममवगाहतां मनोरुचिरम्।
नन्दकिशोरमनोहरशरीरतेजः कळिन्दजापूरम्॥ २३ ॥

मह इह मनसि विलग्नं मणिमयकाञ्चीमनोहरवलग्नम्।
गोपीकटाक्षमग्नं गोप्तुं क्षममेवमां भवविविग्नम्॥ २४ ॥

विन्दे पदारविन्दे मन्देतरविभवदे कृतानन्दे।
नन्दकुलामन्दकला बृन्दविलासस्य कस्यचिद्धाम्नः॥ २५ ॥

इति महिशूरपुरोत्तमनरपतिचामेन्द्रभूपकुलगुरुणा।
कलिता स्तुतिर्विजयतां श्रीकृष्णब्रह्मतन्त्रकलिरिपुणा॥ २६ ॥

॥ इति प्रपन्नामृतस्तोत्रं संपूर्णम्॥

www.prapatti.com